**Bachelor of Arts (B.A.) Part–I Second Semester Examination**

**SANSKRIT**

**Optional Paper—1**

**(Literature)**

835

समय: — होरात्रयम्] [पूर्णाङ्का: — 80

**सूचना :**— विशेषनिर्देशाभावे उत्तराणि स्वीकृतभाषया लिखत ।

**(स्वप्नवासवदत्तम्)**

1. श्लोक**द्वयस्य** सप्रकरणम् अनुवादं कुरुत : 10

(i) पूर्वं त्वयाप्यभिमतं गतमेवमासी
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्तुः ।
कालक्रमेण जगतः परिवर्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ।।

(ii) दुःखं त्यक्तुं बद्धमुलोऽनुरागः
स्मृत्वा स्मृत्वा याति दुःखं नवत्वम् ।
यात्रा त्वेषा यद् विमुच्येह बाष्पं
प्राप्तानृण्या याति बुद्धिः प्रसादम् ।।

(iii) रूपश्रिया समुदितां गुणतश्च युक्तां
लब्ध्वा प्रियां मम तु मन्द इवाद्य शोकः ।
पूर्वाभिघातसरुजोऽप्यनुभूतदुःखः
पद्मावतीमपि तथैव समर्थयामि ।।

(iv) प्रच्छाद्य राजमहिषीं नृपतेहितार्थं
कामं मया कृतमिदं हितमित्यवेक्ष्य ।
सिद्धेऽपि नाम मम कर्मणि पार्थिवोऽसौ
किं वक्ष्यतीति हृदयं परिशङ्कितं मे ।।

2. वाक्य**द्वयस्य** ससन्दर्भं स्पष्टीकरणं लिखत : 10

(i) एवमविर्ज्ञातानि दैवतानि अवधूयन्ते ।

(ii) अयुक्तं परपुरुषसंकीर्तनं श्रोतुम् ।

(iii) सर्वजनमनोभिरामं खलु सौभाग्यं नाम ।

(iv) सदाक्षिण्यस्य जनस्य परिजनोऽपि सदाक्षिण्य एव भवति ।

3. स्वप्नवासवदत्तम् इति नाटकस्य स्वप्नप्रसङ्गस्य नाट्यदृष्ट्या महत्वं स्पष्टीकुरुत । 10

**अथवा**

ब्रह्मचारिप्रवेशस्य नाट्यदृष्ट्या प्रयोजनं विवेचयत ।

4. चरित्रचित्रणं कुरुत : 10

उदयनः **अथवा** वासवदत्ता ।

5. टिप्पणी**द्वयं** लिखत : 10

(i) नान्दी (ii) प्रवेशकः (iii) विदूषकः (iv) भरतवाक्यम्

6. संस्कृत-नाटकानां विशेषान् विवेचयत । 10

**अथवा**

स्वप्नवासवदत्तम् इति नाटकस्य नाटकत्वं प्रतिपादयत ।

7. टिप्पणी**द्वयं** लिखत : 10

(i) प्रहसनम् (ii) प्रकरणम् (iii) समवकारः (iv) भाणः

8. (अ) उचितपर्यायैः रिक्तस्थानानि पूरयत : 5

(i) नान्दीगानं .................... करोति ।

(काञ्चुकीयः सूत्रधारः, विदूषकः)

(ii) संस्कृतसाहित्ये रूपकस्य .................. प्रकाराः वर्णिताः ।

(अष्ट, नव, दश)

(iii) प्रकरणे ....................... अङ्काः सन्ति ।

(अष्ट, नव, दश)

(iv) प्रहसनं ...................... रसप्रधानम् अस्ति।

(करुण, वीर, हास्य)

(v) नाटके प्रायः ................... रसः प्रधानः वर्तते ।

(करुण, रौद्र, श्रृंगार)

(ब) प्रश्नानाम् उत्तराणि **संस्कृतभाषया** लिखत : 5

(i) पद्मावती कस्य भगिनी ?

(ii) स्वप्नवासवदत्ते कति अङ्काः सन्ति ?

(iii) महासेनः कस्याः पिता ?

(iv) उदयनः कस्यां कलायां निपुणः आसीत् ?

(v) स्वप्नप्रसङ्गः नाटकस्य कस्मिन् अङ्के अस्ति ?